दिनाङ्कः 17 .03.2026

प्रातः - 06:55

## अथ वार्ताः

### विधानसभा-निर्वाचनम्

निर्वाचन-आयोगस्य अधिसूचनात् परम् असम, केरलम्, पुडुचेरी राज्यानां विधानसभा-निर्वाचनार्थं नामाङ्कन-पत्रस्य प्रपूरणम् आरब्धम् वर्तते । एतैः सह तमिलनाडु-पश्चिमबङ्ग-राज्ययोरपि विधानसभानिर्वाचनस्य समयसूची रविवासरे घोषिता। असम, केरलम्, पुडुचेरी राज्येषु एप्रिलमासस्य प्रथम-दिनाङ्के मतदानं भविष्यति । सर्वेषां पंचराज्यानां मतगणना मे-मासस्य चतुर्थे दिनाङ्के भविष्यति।

### पश्चिम-बंग-निर्वाचनम्

पश्चिम-बंग-राज्ये आगामिविधानसभानिर्वाचनं दृष्ट्वा निर्वाचन-आयोगेन राज्यस्य सर्वेभ्यः आरक्षि-स्थानकेभ्यः आगामि-गुरुवासरपर्यन्तं स्वस्वक्षेत्रेषु विधि-व्यवस्थायाः स्थितिविषये विस्तृतं प्रतिवेदनं दातुं निर्देशः प्रदत्तः। प्रतिवेदने शस्त्रसञ्चयस्य, चिह्नितानां असामाजिकतत्त्वानां, अपराधसम्बद्धानां दत्तांशस्य सूचना अवश्यं भवितव्या।

### पश्चिम-बंग-निरीक्षणम्

पश्चिमबङ्ग-राज्ये निर्वाचनार्थं प्रौद्योगिक्या चालितनिरीक्षणे विशेषं बलं दीयते । मतदानकक्षेषु शतप्रतिशतम् वेब्-कास्टिंग् अनिवार्यं क्रियते । यदि कस्मिन् अपि मतदान-स्थाने वेबकास्टिंग् न क्रियते तर्हि पुनः निर्वाचनस्य निर्णयः विचारितः भविष्यति । राज्यस्य निर्वाचन-इतिहासे प्रथमवारं बृहत्-जन-समागमेषु अथवा संवेदनशीलक्षेत्रेषु परिस्थितेः निरीक्षणं कर्तुं ड्रोन्-यन्त्राणि कार्यान्वितानि भविष्यन्ति ।

### भाजपा-सूची

पश्चिम-बङ्गाल तथा केरलम् राज्ययोः विधानसभानिर्वाचनार्थं भाजपा-दलस्य अभ्यर्थीनां प्रथमा सूची प्रकाशिता । पश्चिमबङ्ग-राज्ये दलेन नन्दीग्रामतः भवानी-पुरतः च विपक्षनेता सुवेन्दु अधिकारी विधानसभा-आसनार्थं स्पर्धिष्यति । केरलम्-राज्ये केन्द्रीयमन्त्री जार्ज कुरियनः कञ्जीरापल्ली-आसनार्थम्, दल-प्रदेशाध्यक्षः पूर्वकेन्द्रमन्त्री राजीवचन्द्रशेखरः नेमोम-तः स्पर्धां करिष्यति । पूर्वकेन्द्रीयमन्त्री वी मुरलीधरनः कजाकूटम-क्षेत्रे स्पर्धिष्यति । सीपीएम नेतृत्वे एलडीएफ-दलेन केरलम् राज्ये विधानसभानिर्वाचनस्य अभ्यर्थीनां प्रथमसूची प्रकाशिता । सूच्यां मुख्यमन्त्री पिनारायी विजयनः, वित्तमन्त्री के एन बालागोपाल इत्याभ्यां सह आहत्य पञ्च-सप्ततिः अभ्यर्थिनः वर्तन्ते ।

**मन्त्रालय-सूचना**

शिवलिक नामिका एलपीजी-वाहक-नौका षट्चत्वारिंशत्-सहस्र-मेट्रिकटन-मितस्य द्रवीकृत-पेट्रोलियम-अनिलस्य (एलपीजी) वहनं कृत्वा कतारदेशात् ह्यः गुजरातस्य मुण्ड्रा-नौ-स्थानकम् प्राप्ता । नवदिल्लीनगरे पश्चिम एशियायां प्रचलित-विद्यमानानां विषये सम्बोधयन् नौकास्थानक-नौकायान-जलमार्ग-मन्त्रालयस्य विशेषसचिवः राजेशकुमारसिन्हा इत्यनेन सूचितं यत् अद्य अन्या भारतीय-एलपीजी-वाहक-नौका नन्ददेवीति आगमिष्यति । सः अपि अवदत् यत् यूएई-देशात् निर्गता भारतीयध्वजयुक्ता वाहक-नौका जग-लाडकी भारतं प्रति सुरक्षितरूपेण आगच्छन्ती वर्तते ।

**कतारदूतावास-**

दोहानगरे भारतीयदूतावासेन उक्तं यत् कतारवायुसेवायाः विमानयानेषु ह्यः प्रायः एकशतोत्तर-एकसहस्रं भारतीययात्रिकाः नवदिल्ली, मुम्बई, कोच्चि इत्यादिषु गन्तव्यस्थानेषु गतवन्तः। कतारदेशे भारतीयदूतावासेन विज्ञप्तौ उक्तं यत् अद्यापि एतेषु गन्तव्यस्थानेषु विमानयानस्य योजना वर्तते । अनेन उक्तं यत्, कतारवायुसेवा अहमदाबाद, अमृतसर, बेङ्गलूरु, चेन्नै, दिल्ली, हैदराबाद, कोच्ची, कोझीकोड, मुम्बई इत्यादिषु गन्तव्यस्थानेषु अष्टादश-मार्चतः विमानयान-सेवायाः आरम्भं करिष्यति ।

**अफगानिस्तान - आक्रमणम् :**

अफगानिस्तानस्य राजधानी काबुलनगरस्य एकस्मिन् चिकित्सालये गतरात्रौ पाकिस्तानस्य विमानप्रहारेण न्यूनातिन्यूनं चतुश्शतम् जनाः मृताः, प्रायः सार्धद्विशतम्-जनाः व्रणिताः सन्ति । तालिबान्-सर्वकारस्य प्रवक्ता जबिहुल्लाह मुजाहिदः अवदत् यत् पाकिस्तानस्य विमानप्रहारेण अस्य चिकित्सालयस्य विशालः भागः नष्टः अस्ति, अतः मृतानां संख्या वर्धयितुं शक्नोति।

**श्रीलङ्का-ईंधनस्य अभावः-**

श्रीलङ्कादेशेन घोषितं यत् येन ईंधन-आपूर्ति-समस्यायाः न्यूनीकरणाय, सर्वकारीयकार्यालयानाम्, विद्यालयानां, विश्वविद्यालयानाम्, न्यायालयानाम् च कृते प्रति-बुधवास रः अतिरिक्त-साप्ताहिक-अवकाश-रूपेण आचर्यते । आवश्यक-सेवानां महा-युक्तः अवदत् यत् एषः उपायः मार्च-अष्टादशदिनांकादेव कार्यान्वितः भविष्यति ।

**अमृत उद्यानम्**

राष्ट्रपति भवनस्य अमृत उद्यानम्, अद्यारभ्य वरिष्ठ नागरिकाणां कृते विशेष रूपेण उद्घाटितो भविष्यति। मन्त्रालयेन उक्तं यत् वरिष्ठनागरिकाणां कृते अमृत-उद्यानस्य सौन्दर्यस्य अनुभवस्य अवसरं प्रदातुं सामाजिक-मनोरञ्जनात्मकेषु च कार्येषु तेषां सहभागितां प्रोत्साहयितुं च इदम् आयोजनं कृतमस्ति ।

।। इति वार्ता:।।